# Indra's Hymn to Krishna

# ઇન્દ્રકૃતા શ્રીકૃષ્ણસ્તુતિઃ

## Document Information

Text title : Indra's Hymn to Krishna

File name : kRRiShNastutiHindra.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Transliterated by : DKM Kartha

Proofread by : PSA Easwaran

Description/comments : padmapurANam/khaNDaH 6 (uttarakhaNDaH)/adhyAyaH 245/shlokAH 186-210

Latest update : March 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# Indra's Hymn to Krishna

## ઇન્દ્રકૃતા શ્રીકૃષ્ણસ્તુતિઃ

તતઃ શતક્રતુર્દેવઃ સમેત્ય મધુસૂદનમ્ ।
તુષ્ટાવ પ્રાઞ્જલિર્ભૂત્વા હર્ષગદ્ગદયા ગિરા ॥ ૧૮૬॥

ઇન્દ્ર ઉવાચ -
નમસ્તે પુણ્ડરીકાક્ષ સર્વજ્ઞાતિ ત્રિવિક્રમ ।
ત્રિગુણાતીત સર્વેશ વિશ્વસ્યાત્મન્નમોઽસ્તુ તે ॥ ૧૮૭॥

ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમોઙ્કારઃ ક્રતુર્હવિઃ ।
ત્વમેવ સર્વદેવાનાં પિતા માતા ચ કેશવ ॥ ૧૮૮॥

અગ્રે હિરણ્યગર્ભસ્ત્વં ભૂતસ્ય સમવર્ત્તત ।
ત્વમેવૈકઃ પતિરસિ પુરુષસ્ત્વં હિરણ્મયઃ ॥ ૧૮૯॥

પૃથિવીં દ્યામિમાં દેવ ત્વમેવ ધૃતવાનસિ ।
આત્મદઃ ફલદો યશ્ચ સ્યાદેવં જગદીશ્વર ॥ ૧૯૦॥

અવાપ્તં તચ્ચ ત્રિદશૈઃ પ્રકાશં જગતામ્પતેઃ ।
અમૃતં ચૈવ મૃત્યુશ્ચ છાયા તવ સનાતન ॥ ૧૯૧॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।
હેમવન્ત ઇમે યસ્ય સમુદ્ભૂતા હિરણ્મયાઃ ॥ ૧૯૨॥

સમુદ્રા રસના યસ્ય વાહસ્તસ્યૈવ કેશવ ।
ઇમા દિશઃ પ્રતિદિશો વાયુર્યસ્ય તવાવ્યય ॥ ૧૯૩॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।
યેન ત્વયા સમારૂઢા પૃથિવી વર્દ્ધતા પુનઃ ॥ ૧૯૪॥

સ્વર્લોકઃ સ્તમ્ભિતો યેન ત્વયા બ્રહ્મન્મહેશ્વર ।
ત્વમન્તરિક્ષે રજસો વસાનઃ સર્વગોઽવ્યયઃ ॥ ૧૯૫॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।

યં ક્રન્દસિ રાજમાને તત્પ્રભાસે ગુણાન્વિતે ॥ ૧૯૬॥

અભ્યૈક્ષેતાં ચ મનસા અવશ્યં શ્રીશ્ચ સર્વદા ।
યત્રાસ્તિ સૂર ઉદિતો વિભાતિ પરમે પદે ॥ ૧૯૭॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।
યદાપો બૃહતીર્વિશ્વ બ્રહ્મમાયં જનાર્દનાઃ ॥ ૧૯૮॥

ગર્ભં દધાનાઃ સર્ગેઽત્ર જનયન્તીરઘૌઘકૃત્ ।
સમવર્તત દેવાનામસુરેકોઽવ્યયો વિભુઃ ॥ ૧૯૯॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।
યા આપો મહિના દક્ષં પર્યપશ્યત્પ્રજાપતિમ્ ॥ ૨૦૦ (૬.૨૪૫.૨૦૦)
યજ્ઞં દધાનાસ્તત્રાદૌ જનયન્તીર્હવિઃ પુમાન્ ।
યો દેવેષ્વેક એવાસીદધિદેવઃ પરાત્પરઃ ॥ ૨૦૧॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।
મા નો હિંસીજ્જનિતા યઃ પૃથિવ્યા અવ્યયઃ પુમાન્ ॥ ૨૦૨॥

યો વા દિવં સત્યધર્મા જજાનાવ્યય ઈશ્વરઃ ।
યશ્ચન્દ્રો બૃહતીરપો જજાન સકલં જગત્ ॥ ૨૦૩॥

તસ્મૈ દેવાય ભવતે વિધેમ હવિષા વયમ્ ।
એતાનિ વિશ્વજાતાનિ બભૂવ પરિતા પ્રભો ॥ ૨૦૪॥

ત્વદુત્પન્નપ્રજાધ્યક્ષ ભવિષ્યદ્ભૂતમચ્યુતઃ ।
યજામસ્ત્વાં ચ યત્કામાસ્તન્નો અસ્તુ સમાસતઃ ॥ ૨૦૫॥

ત્રયાણાં પતયઃ સ્યામ તવ કારુણ્યવીક્ષણાત્ ।
હિરણ્મયાખ્યઃ પુરુષો હિરણ્યશ્મશ્રુકેશવાન્ ॥ ૨૦૬॥

આપ્રણખાત્સર્વં હિરણ્યં સવિતા તુ હિરણ્યભાક્ ।
અસૌ સર્વગતો બ્રહ્મા યસ્ત્વાદિત્યે વ્યવસ્થિતઃ ॥ ૨૦૭॥

તદ્વૈ દેવસ્ય સવિતુર્વરેણ્યં ભર્ગ ઉત્તમમ્ ।
સદા ધીમહિ તે રૂપં ધિયો યો નઃ પ્રભાતિ હિ ॥ ૨૦૮॥

નમસ્તે પુણ્ડરીકાક્ષ શ્રીશ સર્વેશ કેશવ ।
વેદાન્તવેદ્ય યજ્ઞેશ યજ્ઞરૂપ નમોઽસ્તુ તે ॥ ૨૦૯॥

નમસ્તે વાસુદેવાય ગોપવેષાય તે નમઃ ।

તત્સર્વધ્વંસનાદેવ અપરાધં મયા કૃતમ્ ॥ ૨૧૦॥

ઇતિ ઇન્દ્રકૃતા શ્રીકૃષ્ણસ્તુતિઃ સમાપ્તા ॥

(પદ્મપુરાણમ્/ખણ્ડઃ ૬ (ઉત્તરખણ્ડઃ)/અધ્યાયઃ ૨૪૫/શ્લોકાઃ ૧૮૬-૨૧૦)

Encoded by DKM Kartha

Proofread by PSA Easwaran

*Indra's Hymn to Krishna*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*